M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 186

Title: Stholipaka

Sate

186

Sthālipāka	Title
	Author
	Editor
	Year, Vols.
	Publisher
186	Remarks

॥ अथस्थालिपाकप्रारंभः ॥

स्था॰ पा॰

१ श्रीगणेशाय नमः॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वरप्रीत्यर्थम
मुककर्म करिष्ये॥ तदंगहोमं कर्तुं स्थंडिलादि करिष्ये॥ इति संकल्प्य गोमयादिलिप्ते
शुद्धे देशे शुद्धमृदा ईशान्यारंभमुदक्संस्थं चतुरंगुलोन्नतमंगुलोन्नतं वा चतु
र्दिक्षु मिलित्वा द्विसप्तत्यंगुलो परिधिकं फलितमष्टादशांगुलविस्तृतं होमानुसा
रेण तदधिकं वा न तु ततो न्यूनं मध्योन्नतं स्थंडिलं कुर्यात्॥ तद्गोमयेन प्रदक्षिणमु
पलिप्य पश्चिमे चत्वारि दक्षिणे षट् उदीच्यां द्वे प्राच्यामर्धमित्यंगुलानि त्यक्त्वा
दक्षिणोपक्रमामुदक्संस्थां प्रादेशमात्रामेकां लेखां तस्या दक्षिणोत्तरयोः प्रागा
यते पूर्वरेखया असंसृष्टे प्रादेशसंमिते द्वे लेखे लिखित्वा तयोर्मध्ये परस्परमसंसृ
ष्टा उदक्संस्थाः प्रागायताः प्रादेशसंमितास्तिस्र इति षड्लेखा यज्ञियशकलमू
लेन दक्षिणहस्तेनोल्लिख्य लेखासु तच्छकलमुदगग्रं निधाय स्थंडिलमद्भिरभ्युक्ष्य

१

शकलमाग्नेय्यां निरस्य पाणिं [illegible] प्रक्षाल्य वाग्यतो भवेत्॥ ततस्तैजसेनासंभवे
मृन्मयेन वा पात्रयुग्मेन संपुटीकृत्य सुवासिन्या श्रोत्रियागारात्स्वगृहाद्वा सम्
द्धं निर्धूममग्निमाहृत्य स्थंडिलादाग्नेय्यां निधाय॥ जुष्टो दमूना॰ आत्रेयो वसु
श्रुतोग्निस्त्रिष्टुप्॥ एह्यग्ने राहूगणो गौतमोग्निस्त्रिष्टुप्॥ अग्न्यानयने वि॰॥ ॐ जु
ष्टो दमूना॰॥ ॐ चा॰२॥ इत्यक्षतैरावाह्य आच्छादनं दूरीकृत्य समस्तव्याहृतीनां परमेष्ठी
प्रजापतिः प्रजापतिर्बृहती॥ अग्निप्रतिष्ठापने वि॰॥ ॐ भूर्भुवः स्वरित्यात्माभिमुखं पा
णिभ्यां षड्लेखासु तत्तत्कर्मसु विहितनामकममुकनामकमग्निं प्रतिष्ठापयामि॥
इत्यग्निं प्रतिष्ठाप्य प्रोक्षितेंधनानि निक्षिप्य वेणुधमन्या प्रबोध्य ध्यायेदेवं॥ चत्वा
रि शृंगा गोतमो वामदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्याने विनि॰॥ ॐ चत्वारि शृंगा
त्रयो अस्य पा॰॥ सप्तहस्तश्च॰॥ स्वाहांतु द॰॥ मेषारूढो ज॰॥ आत्माभि॰॥ ततः पा

र्वणस्थालीपाकेप्रधानदिनात्पूर्वदिनेसद्यस्कालायांपौर्णमास्यामशक्तौवाप्रधानदि
नएवप्रातरौपासनंकृत्वान्वाधानंकुर्यात्॥ तत्रेत्थं॥ आचम्यप्राणानायम्यसमिद्
यंत्रयंवादायदेशकालौस्मृत्वाममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंद
र्शपौर्णमासाभ्यांस्थालीपाकाभ्यांयक्ष्ये॥ तत्रेदानींपौर्णमासेनयक्ष्ये॥ दर्शेतुपूर्वं
संकल्पितेनदर्शस्थालीपाकेनयक्ष्यइतिविशेषः॥ तत्रदेवतापरिग्रहार्थमन्वाधानं
करिष्यइतिसंकल्प्यास्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजाप
तिंचाघारदेवतेआज्येना ग्नीषोमौचक्षुषीआज्येनात्रप्रधानंअग्निमग्नीषो
मौच प्रधानदेवतेचरुद्रव्येण॥ दर्शेतु॥ अग्निमिंद्राग्नीचप्रधानदेतेचरु-चरुद्र
व्येणेतिविशेषः॥ शेषेणस्विष्टकृतमग्निमिध्मसंनहनेनरुद्रमयासमग्निंदेवान्वि
ष्णुंअग्निंवायुंसूर्यंप्रजापतिंचैताःप्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिब

र्हणार्थंत्रिवारमग्निंमरुतश्चाज्येनविश्वान्देवान्संस्रावेणअंगदेवताःप्रधानदेवताःस
र्वाःसंनिहिताःसंतुसांगोपांगेनकर्मणाश्वोवासद्योवायक्ष्ये॥ व्याहृतीनांपरमेष्ठीप्रजा
पजापतिः प्रजापतिर्बृहती॥ अन्वाधानसमिद्धोमेविनियोगः॥ ॐभूर्भुवस्वः स्वाहा
प्रजापतयइदं॥ इध्माबर्हिषोश्चसंनहनं॥ ततःप्रतिपदिप्रातरौपासनंकृत्वा॥ अग्निं
परिसमुह्यपरिस्तृणीयात्॥ तत्रप्राच्यांप्रतीच्यां॥ ततोग्नेर्दक्षिणतोब्रह्मासनार्थं
उत्तरतश्चपात्रासादनार्थंकांश्चित्प्रागग्रान्दर्भान्स्तृणीयात्॥ अग्नेरीशानीतस्त्रिरंभ
सापरिषिच्यउत्तरास्तीर्णेषुदर्भेषुदक्षिणसव्यपाणिभ्यांक्रमेणचरुस्थालीप्रोक्षण्यौ
दर्वीस्रुवौप्रणीताआज्यपात्रेइध्माबर्हिषीशूर्पेकृष्णाजिनेउलूखलमुसलेचेतिद्वंद्वे
उदगपवर्गंप्राक्संस्थं न्युब्जान्यासादयेत्॥ आज्यमात्रहोमेतुप्रोक्षणीस्रुवौप्रणी

स्था·पा·
४

वोल्मुकेन चरुणास ह्याज्यं त्रिः पर्यग्निकृत्वा तदुल्मुकमपास्याप: स्पृष्ट्वाज्यपात्रं भुविक
र्षं निधायोदगुद्वास्यांगारानग्नौ प्रास्याप: स्पृष्ट्वा तस्मिन्नेवाज्यं ॥ सवितुष्ट्वा हिरण्यस्तूप: त्र
सविता पुर उष्णिक् ॥ आज्यस्योत्पवने ॥ ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण प
वित्रेण वसो: सूर्यस्य रश्मिभिरिति मंत्रेणैकश्कृत्वाद्वारिते नैकवारं द्विस्तूष्णीमुत्तानपा
णिद्वयांगुष्ठोपकनिष्ठिकाभ्यामं तयोरसंस्पृष्टगृहीताभ्यामुदगग्राभ्यां पवित्राभ्यां
प्रागुत्पूयते पवित्रे अद्भि: प्रोक्ष्याग्नौ प्रहरेत् तूष्णीं ॥ स्कंदाय स्वाहेति मंत्रेण केचि
त् ॥ अथाग्ने: पश्चात्परिस्तरणाद्बहिरात्मनोग्रतो भुवं प्रोक्ष्य तत्र बर्हि: संनहनीरज्जु
मुदगग्रां प्रसार्य तस्यां बर्हि: प्रागग्रमुदगपवर्गमविरलमास्तीर्य तस्मिन्नाज्यपात्रं
निधाय स्रुवादि संमार्जयेत् ॥ तद्यथा ॥ दक्षिणहस्तेन स्रुवं गृहीत्वा सव्येन काश्चि स्रु
द्दर्भानादाय सहैवाग्नौ प्रताप्य स्रुचं निधाय दक्षिणहस्तेन स्रुवस्य बिलं दर्भाग्रै: प्रा
४

प्र
गादि प्रागपवर्गं त्रि: सन्मृज्याधस्ता [illegible]
द [illegible] द्दर्भाग्रैणैवाभ्यासं बिलं पृष्ठं त्रि: संमृज्य ततो दर्भाणां मूलैर्दंडस्याधस्ताद्बिलपृष्ठा
भ्य द्वारं यावदुपरिष्टाद्बि[illegible]लं तावत्त्रि: संमृज्याद्भि: प्रोक्ष्यैवं निष्टप्याज्यस्थाल्या उत्तरत: स्रु
स्रुगस्पृष्टं निधायोदकं स्पृष्ट्वा तैरेव दर्भै: जुहूं चैवमेव संमृज्य स्रुवादुत्तरतो निधा[illegible]
य दर्भानद्भि: क्षालयित्वाग्नावनुप्रहरेत् ॥ तत: शृतं चरुं स्रुवं गृहीत्वा नाज्येनाभि
घार्योदगुद्वास्याग्न्याज्ययोर्मध्येन नीत्वाज्याद्दक्षिणतो बर्हिषि सांतरमासा[illegible]घ
र पुनर्नाप्यभिघार्यं न वाभिघार्यं हवि: पृथक्करणाय पात्रांतरं चर्वाज्ययोर्मध्ये निधा
यैकादशांगुलिपरिमिते देशे गंधाक्षतपुष्पैरग्निं समंत्रमर्चयेत् ॥ तत्र मंत्रो ॥ वि
स्र श्वानि न इति त्रिर्पंचस्कृतोग्निस्त्रिष्टुप् ॥ ह्यमे र्चनेनै विनियोग: ॥ ओं विश्वानि नो०
कं०पा० २॥ आत्मानं चालंकृत्य हस्तप्रक्षाल्य पद्धमबंधनरज्जुमिध्मस्थाने निधाय
अंत्यायाउपरणने २

पाणिनेध्ममादायमूलमध्याग्रेषुस्रुवेणाभिघार्यमूलमध्ययोर्मध्यभागेगृहीत्वा
॥अयंतेवामदेवोजातवेदाअग्निस्त्रिष्टुप्॥इध्महवनेविनि०॥अयंतइध्मआत्मा
जातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्ना
द्येनसमेधयस्वाहा॥जातवेदसेअग्नयइदंनमम॥आघारहोमे॥वायव्यकोणमारभ्य
आग्नेयकोणपर्यंतंप्रजापतयेस्वाहा॥प्रजापतयइदंनमम॥निर्ऋतिकोणमार
भ्यईशानकोणपर्यंतं॥प्रजापतयेस्वाहा॥प्रजापतयइदंनमम॥अग्नेरुत्तरपा
र्श्वेअग्नयेस्वाहा॥अग्नयइदं०॥अग्नेर्दक्षिणपार्श्वेसोमायस्वाहा॥सोमाय
स्रु इदं०॥स्रुवेणाज्यमुपस्तीर्यप्रथमप्रधानदेवताचरुभागमध्यादंगुष्ठ
पर्वमात्रंतिरश्चीनाभिरंगुष्ठमध्यमानामिकाभिरुदग्राभिर्नखस्पर्शमकुर्वन्न
वदायदर्व्यांमोप्यततश्चरुपूर्वभागंप्रागग्राभिस्तथैवावदायदर्व्यांमोप्यपात्रस्थह
* पूर्वनिहितपात्रेचरुमुद्धृत्यएषकल्पदेइदमग्नयेइदमग्नीषोमाभ्यामितिसभिमृश्य* ५

विरभिघार्यदर्वीस्थमवत्तंचाभिघार्यविधूमाग्निज्वालाग्नौअग्नयेस्वाहेत्याज्यभाग
स्यक योर्मध्यदेशेतत्पूर्वदेशेवा॥आच्छादयंनिवदर्व्यांपार्श्वेनहुत्वाग्नयइदंनममेतित्य
क्त्वापुनःपूर्ववदुत्तरहविर्भागादवदाय॥ॐअग्नीषोमाभ्यांस्वाहेतिपूर्वाहुतेःप्राग्भा
गेहुत्वाग्नीषोमाभ्यामिदंनममेतित्यजेत्॥पंचावत्तीतुदर्व्यामुपस्तीर्यमध्यात्पू
र्वार्धात्पश्चार्धाच्चत्रिर्हविषोवदायाभिघार्यजुहुयात्॥पंचावत्तिनस्तु॥जामदग्न्या
वत्सविदावार्ष्टिषेणास्तथैवच॥भार्गवच्यावनाऔर्वाः पंचावत्तिनईरिताः॥दर्शे
तुअग्नीषोमस्थानेइंद्राग्निभ्यांइतिविशेषः॥पुनर्दर्व्यामुपस्तीर्यप्रथमहविर्भा
गस्योत्तरार्धतः॥पूर्वावदानतोभूयोनूचीनाभिरेवांगुलीभिरवदायदर्व्यामोप्य
द्वितीयहविर्भागस्यत्तथैवावदायपंचावत्तीतुहविर्भागद्वयेपिउत्तरार्धात्पूर्वार्धा

चद्विर्द्विरवद्यपात्रस्थमनभिघार्यावत्तंतुद्विरभिघार्ययदस्येतिहिरण्यगर्भोग्निस्त्रि
ष्टुब्द्वितिधृतिः स्विष्टकृद्धोमेविनियोगः॥ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमि
हाकरं॥अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वंस्विष्टंसुहुतंकरोतुमे॥अग्नयेस्विष्टकृ
तेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्धयित्रेसर्वान्नःकामांत्सम
र्धयस्वाहे त्येकश्रुत्योच्चार्यअग्नावीशानदेशेजुहुयात्॥अग्नयेस्विष्टकृ
तइदंनममेतित्यागः॥ततोग्नेरुत्तरतस्थितामिध्मबंधनरज्जुंविलस्यरुद्रायपशु
पतस्वाहेतिहुत्वापःस्पृष्ट्वास्रुवेणप्रायश्चित्ताज्याहुतीःसप्तजुयात्॥तत्रमंत्राः॥
अयाश्चेतिविमदोअयाअग्निःपंक्तिः॥प्रायश्चित्ताज्यहोमेवि०॥ॐअयाश्चा
ग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि॥अयासावयसाकृतोयासन्हव्यमू

हिषेयानोधेहिभेषजंस्वाहा॥अयसेग्नयइदंनमम॥अतोदेवामेधातिथिर्देवागा
यत्री॥प्रायश्चित्ताज्यहोमेविनि०॥ॐअतोदेवाअ०॥देवेभ्यइदंनमम॥इदंविष्णु
र्मेधातिथिर्विष्णुर्गायत्री॥प्रायश्चित्ताज्यहोमेविनि०॥ॐइदंविष्णुर्विच०॥सुरे
स्वाहा॥विष्णवइदं०॥व्यस्तसमस्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजप्र
जापतयोग्निवायुसूर्यप्रजापतयोगायत्र्युष्णिगनुष्टुप्बृहत्यः॥ॐभूस्वाहा
ग्नयेइदं०॥ॐभुवःस्वाहा॥वायवइदं०॥ॐस्वःस्वाहा॥सूर्यायइदं०॥ॐभूर्भुवःस्वः
स्वाहा॥प्रजापतयइदं०॥यद्वोदेवाअभितपामरुतस्त्रिष्टुप्॥मंत्रविपर्यासादि
निमित्तकप्रायश्चित्ताज्यहोमेविनि०॥ॐयद्वोदेवाअतिपात०॥निधेतनस्वा
हा॥जंयेमानः॥मरुद्भ्यइदंनमम॥अनाज्ञातमितिमंत्रद्वयस्यहिरण्यगर्भोग्नि
स्त्रिष्टुप्॥ज्ञाताज्ञातदोषनिबर्हणार्थमाज्यहोमेविनि०॥ॐअज्ञानोतंयदाज्ञा

तंय॰॥ तय४ंस्वाहा॥ अग्नयइदं॰॥ पुरुषसंमितोयज्ञोयज्ञःपुरु॰॥ तय४ंस्वाहा॥
अग्नयइदं॰॥ यस्याकर्मनेत्यास्यरिरिचोग्निस्त्रिष्टुप्॥ ज्ञाताज्ञातहो॰ ॐ यस्याक
र्मनसादीनदक्षान॰॥ प्रजापतिस्वाहा॥ यजमानः अग्नये॰॥ सांगतासिध्य
र्थंसर्वप्रायश्चित्तंकरिष्ये॥ ॐ भूर्भुवःस्वःस्वाहा प्रजापतयइदंनमम॥ संस्रा
वंहुत्वा ॐ विश्वेभ्योदेवेभ्यःस्वाहा विश्वेभ्योदेवेभ्यइदं॰॥ बर्हिषिपूर्णपात्रंनिन
येत्॥ ॐ पूर्णमसिपूर्णंमेभूयाः सुपूर्णमसिसुपूर्णंमेभूयाः सदसिसन्मेभूयाः
सर्वमसिसर्वंमेभूयाः अक्षितिरसिमामेक्षेष्ठा इतिपित्वाकुशाग्रैः प्रागादिपंच
दिक्षुजलंमंत्रैर्यथालिंगंसिंचेत्॥ तेचमंत्राः॥ प्राच्यांदिशिदेवाऋत्विजोमा
र्जयंतांदक्षिणस्यांदिशिमासाः पितरोमार्जयंतां॥ अपउपस्पृश्य॥ प्रतीच्यां
दिशिगृहाः पशवोमार्जयंतां उदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतां

ऊर्ध्वायांदिशियज्ञःसंवत्सरःप्रजापतिर्मार्जयंतामित्येकैकस्यापठन्प्रतिदिशं
सिक्त्वाकुशाग्रैःस्वशिरसिमार्जयेत्॥ तत्रमंत्राः॥ आपोअस्मान्नित्यस्यदेव
श्रवआपस्त्रिष्टुप्॥ मार्जनेवि॰॥ ॐ आपोअस्मान्मातरःशुंधयंतुघृतेननो
घृतप्वःपुनंतु॥ विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि॥ इदमा
पःसिंधुद्वीपआपोनुष्टुप्॥ मार्जनेवि॰॥ ॐ इदमापःप्रवहतयत्कि॰॥ सुमित्र्या
नआपओषधयःसंतु॥ दुर्मित्र्याःस्तस्मैसंतु॥ योअस्मान्द्वेष्टियंचवयंद्विष्म
स्तंहन्मि॥ इतिनिर्ऋतिदेशेकुशाग्रैरपःसिंचेत्॥ ततोब्रह्मायजमानवामपार्श्वेस्थि
तपत्न्यंजलौपूर्णपात्रस्थंजलं॥ ॐ माहंप्रजांपरासिचंयानःसयावरीस्थन॥ समु
द्रेवोनिनयास्वंपाथोअपीथेतिपठन्पत्न्यंजलिस्थजलैःपापापनोदार्थं
आत्मानंपत्नींचप्रोक्षेत्॥ ततःकर्ताअग्नेर्वायव्यदेशेतिष्ठन्नुपतिष्ठेत॥ अग्नेतं

नइतिवतस्रणांगोपायनालोपायनावाबंधुःस्रुबंधुःश्रुतबंधुर्विप्रबंधुश्चैकर्चा
ऋषयः॥अग्निर्देवताद्विपदाविराट्छंदः॥अग्न्युपस्थानेविनि०॥ॐअग्नेत्व
न्नोअंतम०॥सखिभ्यः॥ॐचमेस्वश्चमे०तेनमः॥स्वस्तिश्रद्धां०हनोनमोन
मः॥मानस्तोकेकुत्सोरुद्रोजगती॥विभूतिग्रहणेवि०॥मनस्तोकेतन०हवाम
हे॥इतिस्रुवबिलप्रष्ठेनविभूतिंगृहीत्वा॥त्र्यायुषंज०ललाटे॥कश्यपस्य०कंठे
अगस्त्यस्य०नाभौ॥यद्देवानां०दक्षिणस्कंधे॥तन्मेअस्तु०वामस्कंधे॥सर्व
मस्तु०शिरसि॥परिस्तरणानिविसृज्याग्निंपरिसमुह्यपरिषिच्यविष्णानिनइ
त्यर्चयित्वानत्वाचपुष्पादिभिरलंकृत्यनैवेद्यतांबूलंचनिवेद्यब्राह्मणयथोक्तद
क्षिणांदक्षिणांदत्वापात्राणिप्रक्षाल्यपूर्वक्रमेणद्वंद्वंशउत्सृज्ययस्यस्मृत्येतिश्रीवि
ष्णुंनत्वाचम्यधृतपवित्रग्रंथिंविस्रस्यभूस्यदेशेक्षिपेत्॥होजवलिकरोइत्युपनामक
महादेवभट्टसुतविनायकेनलिखितं॥शाके१७६८रापभवनामसंवत्सरेआषाढशुा४